# කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

## දුරස්ථ සහ අඛණ්ඩ අධ්‍යාපන කේන්ද්‍රය

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි තෘතීය පරීක්ෂණය (බාහිර) - 2010
2012 අප්‍රේල්/ මැයි/ ජූනි

මානවශාස්ත්‍ර පීඨය

**සංස්කෘත - SANS- E3015**


**සංස්කෘත කාව්‍ය විචාරය හා නාට්‍ය විචාරය බෞද්ධ සංස්කෘත සාහිත්‍යය**

**පළමු ප්‍රශ්නයට හා තවත් ප්‍රශ්න <u>හතරකට (04)</u> පිළිතුරු සපයන්න.**

ප්‍රශ්න සංඛ්‍යාව : 08 යි | කාලය : පැය 03 යි

---

01. මෙහි දක්වා ඇති සංස්කෘත පාඨ අතරින් **හතරක් (04)** සිංහලයට පරිවර්තනය කරන්න.

I

गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥२१॥

वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्ष वर्णनञ्च धिनोति नः॥२२॥

अपादः पदसन्तानो गद्यमाख्यायिका कथा।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल॥२३॥

नायकेनैव वाच्यान्या नायकेनेतरेण वा।
स्वगुणाविष्क्रिया दोषो नात्रभूतार्थशंसिनः॥२४॥

काव्यादर्श।

II

पुनरपरे तस्याभावमन्यथा कथयेयुः—न संभवत्येव ध्वनिर्नामापूर्वः कश्चित्। कामनीयकमनतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात्। तेषामन्यतमस्यैव वा पूर्वसमाख्यामात्रप्रकरणे यत्किंचन कथनं स्यात्। किं च वाग्विकल्पानामानन्त्यात्संभवत्यपि वा कस्मिंश्चित्काव्यलक्षणविधायिभिः प्रसिद्धैरदर्शिते प्रकारलेशे ध्वनिर्ध्वनिरिति तदलीकसहृदयत्वभावनामुकुलितलोचनैर्नृत्यते। तत्र हेतुं न विद्मः। सहस्रशो हि महात्मभिरन्यैरलङ्कारप्रकाराः प्रकाशिताः प्रकाश्यन्ते च।

ध्वन्यालोक।

III

अथ हास्यो नाम हासस्थायिभावात्मकः। स च विकृतपरवेषालङ्कारधाष्ठर्यलौल्यकुहकासत्प्रलापव्यङ्गदर्शनदोषोदाहरणादिभिर्विभावैरुत्पद्यते तस्योष्ठनासाकपोलस्पन्दनदृष्टि व्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिरनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिणश्चास्यावहित्थालस्यतन्द्रानिद्रास्वप्नप्रबोधासूयादयः। द्विविधश्चायमात्मस्थः परस्थश्च। यदा स्वयं हसति तदाऽऽत्मस्थः। यदा तु परं हासयति तदा परस्थः।

अत्रानुवंश्ये आर्ये भवतः।

विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हासः॥
विकृताचारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च।
हासयति जनं यस्मात्तस्माज्ज्ञयो रसो हास्यः।
स्त्रीनीचप्रकृतावेष भूयिष्टं दृश्यते रसः।
षड्भेदाश्चास्य विज्ञेयास्तांश्च वक्ष्याम्यहं पुनः॥
स्मितमथ हसितं विहसितमुपहसितं चापहसितमतिहसितम् द्वौ द्वौ भेदौ
स्यातामुत्तममध्याधमप्रकृतौ॥ (नाट्यशास्त्रम्)

IV

अथ खलूत्तरस्यां दिशि सूर्यावर्ताया लोकधातोश्चन्द्रसूर्यजिह्मीकरप्रभस्य तथागतस्य बुद्धक्षेत्राद्व्यूहराजो नाम बोधिसत्त्वो महासत्त्वस्तया प्रभया संचोदितः सन् गणनासमति-क्रान्तैर्बोधिसत्त्वैः परिवृतः पुरस्कृतः येन बोधिमण्डो येन च बोधिसत्त्वस्तेनोपसंक्रामत्। उपसंक्रम्य बोधिसत्त्वस्य पूजाकर्मणे यावन्तो दशसु दिक्षु सर्वलोकधातुषु बुद्धक्षेत्रगुणव्यूहास्तान् सर्वांस्तस्मिन् मण्डलमात्रे संदर्शयति स्म। तत्र केचिद्बोधिसत्त्वा एवमाहुः—कस्येमे एवंरूपा व्यूहाः? अथ तेभ्यः सर्वव्यूहेभ्य इयं गाथा निश्चरति स्म--

कायो येन विशोधितः सुबहुशः पुण्येन ज्ञानेन च.
येना वाच विशोधिता व्रततपैः सत्येन धर्मेण च।
चित्तं येन विशोधितं हिरिधृती कारुण्यमैत्र्या तथा
सो एषो द्रुमराजमूलुपगतः शाक्यर्षभः पूज्यते॥ ४॥ इति॥

ललितविस्तरे-XX

V

सचेद्भगवानस्माभिः प्रतीक्षितः स्यात् सामुत्कर्षिकीं धर्मदेशनां कथयमानः, यदिदमनुत्तरां सम्यक्संबोधिमारभ्य, तेष्वेव वयं भगवन् धर्मेषु निर्याताः स्याम। यत्पुनर्भगवन् अस्माभिरनुपस्थितेषु बोधिसत्त्वेषु संधाभाष्यं भगवतोऽजानमानैस्त्वरमाणैः प्रथमभाषितैव तथागतस्य धर्मदेशना श्रुत्वोद्गृहीता धारिता भाविता चिन्तिता मनसिकृता। सोऽहं भगवन् आत्मपरिभाषणयैव भूयिष्ठेन रात्रिंदिवान्यतिनामयामि। अद्यास्मि भगवन् निर्वाणप्राप्तः। अद्यास्मि भगवन् परिनिर्वृतः। अद्य मे भगवन् अर्हत्त्वं प्राप्तम्। अद्याहं भगवन् भगवतः पुत्रो ज्येष्ठ औरसो मुखतो जातो धर्मजो धर्मनिर्मितो धर्मदायादो धर्मनिर्वृत्तः। अपगतपरिदाहोऽस्म्यद्य भगवन् इममेवंरूपमद्भुतधर्ममश्रुतपूर्वं भगवतोऽन्तिकाद् घोषं श्रुत्वा॥

अथ खल्वायुष्मान् शारिपुत्रस्तस्यां वेलायां भगवन्तमाभिर्गाथाभिरध्यभाषत—

आश्चर्यप्राप्तोऽस्मि महाविनायक
औद्बिल्यजातो इमु घोष श्रुत्वा।
कथंकथा मह्य न भूय काचित्
परिपाचितोऽहं इह अग्रयाने॥ १॥
आश्चर्यभूतः सुगतान घोषः
काङ्क्षां च शोकं च जहाति प्राणिनाम्।
क्षीणास्रवस्यो मम यश्च शोको
विगतोऽस्ति सर्वे श्रुणियान घोषम्॥ २॥

सद्धर्मपुण्डरीक।

VI

ततः प्रभृति सुप्तस्य प्रमत्तस्याप्यनेकशः।
अविच्छिन्नाः पुण्यधाराः प्रवर्तन्ते नभःसमाः॥१९॥

इदं सुबाहुपृच्छायां सोपपत्तिकमुक्तवान्।
हीनाधिमुक्तिसत्त्वार्थं स्वयमेव तथागतः॥२०॥

शिरःशूलानि सत्त्वानां नाशयामीति चिन्तयन्।
अप्रमेयेण पुण्येन गृह्यते स्म हिताशयः॥२१॥

किमुताप्रमितं शूलमेकैकस्य जिहीर्षतः।
अप्रमेयगुणं सत्त्वमेकैकं च चिकीर्षतः॥२२॥

बोधिचर्यावतारे 1

धनक्रीडारतो राजा परदारनिरतस्सदा ।
राष्ट्रस्य अप्रियो भवति क्षिप्रं जहति जीवितं ॥९४॥
अलुब्धो पुनर्मेधावी परदारविरतः सदा ।
राष्ट्रस्य प्रियो भवति सुचिरं तात जीवति ॥९५॥
वैरबन्धं च मा कुर्या पाटिराजेहि पार्थिव ।
यो वैरी हि महीपाल वैरमर्पेन्ति वैरिणः ॥९६॥
मित्रबन्धं च कुर्यासि पाटिराजेहि पार्थिव ।
दृढमित्रा हि राजानो पूजेन्ति अपरा प्रजा ॥९७॥
प्रकीर्णचारणो मासि सर्वार्थेहि जनाधिप ।
हेतुकारणसंयुक्तं मन्त्रं कालेन व्याहरे ॥९८॥
गुह्यमर्थं च धारेहि सदा वारेहि पार्थिव ।
भिन्नमन्त्रा हि राजेन्द्रा अनुभोन्ति व्यसनं बहुं ॥९९॥
गुह्यमर्थं धारयित्वा लभते विपुलां श्रियं ।
न चामित्रवसमेति पश्चात्र नानुतप्यति ॥१००॥

महावस्तु अवदान

02. කාව්‍ය විචාර ග්‍රන්ථයක් ලෙස කාව්‍යාදර්ශය ඇගයීමට ලක් කරන්න.

03. අනෙකුත් විචාර සංකල්පනාවන් අතර ධ්වනි සංකල්පය කාව්‍යයන්හි කවර පාර්ශ්වයක් විවරණය කෙරේදැයි සනිදර්ශනව පැහැදිලි කරන්න.

04. නාට්‍ය ශාස්ත්‍රය ඇසුරෙන් හාස්‍ය රසෝත්පත්තිය පිළිබඳ ප්‍රාමාණික විවරණයක් සපයන්න.

05. පහත සඳහන් වෘත්ත අතරින් <u>පහක</u> ලක්‍ෂ්‍ය - ලක්ෂණ පැහැදිලි කරන්න.

i. ඉන්ද්‍රවජ්‍රා
ii. ඉන්ද්‍රවංශා
iii. දොධක
iv. තනුමධ්‍යා
v. සාවිත්‍රී
vi. විද්‍යුන්මාලා
vii. සුමුඛී
viii. මානවක
ix. තොටක
x. ප්‍රියංවදා

06. ලලිත විස්තරයේ බෝධිසත්ව චරිතය වර්ණනාකොට ඇත්තේ මානුෂිකත්වයට වඩා දේවත්වයක් ආරෝපණය කරවමිනි. විමසන්න.

07. සද්ධර්ම පුණ්ඩරීක සූත්‍රයේ ශාරිපුත්‍ර තෙරුන්ගේ පාපෝච්ඡාරණයෙන් පැහැදිලි වන්නේ රහත්භාවය තාවකාලික වූවක් බවයි. විමසීමට ලක්කරන්න.

08. "බෝධි චර්යාව යනු පරාර්ථ චර්යාවයි." බෝධිචර්යාවතාරය ඇසුරින් පැහැදිලි කරන්න.

******************************